# RAMAKRISHNA MISSION VIDYAMANDIRA
(Residential Autonomous College affiliated to University of Calcutta)

**B.A./B.Sc. FOURTH SEMESTER EXAMINATION, AUGUST 2021**
**SECOND YEAR [BATCH 2019-22]**
**SANSKRIT (HONOURS)**
**Paper : IX [CC9]**

Date : 09/08/2021
Time : 11.00 am - 1.00 pm
Full Marks : 50

1. अधोलिखितेषु एकस्य प्रश्नस्योत्तरं लेख्यम्। [1×10]

   क) रेवाप्रसादद्विवेदिमहोदयस्य आधुनिकसंस्कृतक्षेत्रे अवदानम् आलोच्यताम्।

   ख) आधुनिकसंस्कृतसाहित्ये सिद्धेश्वरचन्द्रचट्टोपाध्यायः पथप्रदर्शकरूपेण कथं गुरुत्वमावहति तत्पर्यालोच्यताम्।

   ग) श्रीनिवासरथमहाभागस्य साहित्यवृत्तिः पर्यालोचनीया।

2. अधोलिखितेषु द्वयोः समाधानं कार्यम्। [2×5]

   क) रुक्मिणीहरणम्।

   ख) स्वर्गीयप्रहसनम्।

   ग) तदेव गगनं सैव धरा।

   घ) दारिद्र्यशतकम्।

3. अधोलिखितेषु यथेच्छमेकमुत्तरत। [1×10]

   क) दरिद्रदुर्दैवमिति कीदृशं रूपकम्? तत्र प्रतिपादितं समाजचित्रं प्रतिपादयत। ।

   ख) ‘अथ किम्’ इति नाटकस्य सारसंक्षेपः आलोच्यताम्।

   ग) महाकविना अम्बिकादत्तव्यासेन विरचितस्य शिवराजविजयस्य प्रथमनिश्वासस्य सारसंक्षेपः समासेन आलोच्यताम्।

4. अधोलिखितेषु यथेच्छमेकमुत्तरत। [1×7]

   क) अन्धः कुष्ठी दरिद्रो  वा इत्यादिपद्यं प्रपूर्य व्याख्यात।

   ख) हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वेन भयाद् विमुच्यते।

5. अधोलिखितेषु यथेच्छम् द्वयोः अनुवादः कार्यः। [2×4]

   क) वाञ्छन्ति या हि ललना: पुरुषाधिकारं
   तासां मुखे यदि नवा घनगुम्फशोभा।
   स्थूलस्य तुन्दिलजनस्य यथा च नृत्यं
   दृश्येत चेत् स्फुरति कस्य मुखे न हास्यम्।।

ख) असावेव चर्कर्ति बर्भर्ति जर्हर्ति च जगत्, वेदा एतस्यैव वन्दिनः, गायत्री अमुमेव गायति। ब्रह्मनिष्ठा ब्राह्मणा अमुमेवाहरहरूपतिष्ठन्ते। धन्य एष कुलमूलं श्रीरामचन्द्रस्य , प्रणम्य एष विश्वेषाम्।

ग) अयमेव अहोरात्रं जनयति। अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एषः एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्, एनेनैव सम्पादिता युगभेदाः, एनेनैव कृताः कल्पभेदाः, एनमेवाश्रित्य भवति परमेष्ठिनः परार्धसंख्या।

घ) अथ समापितसन्ध्यावन्दनादिक्रिये समायाते गुरौ, तदाज्ञाया नित्यनियमसम्पादनाय प्रयाते गौरवटौ, छात्रगणसहकारेण प्रस्तुतासु च स्वागतसामग्रीषु, इतः आगम्यतां सनाथ्यताम् एष आश्रमः इति सप्रणाममभिगम्य वदत्सु निखिलेषु योगिराज आगत्य तन्निर्दिष्टकाष्ठपीठं भास्वानिवोदयगिरिमारुरोह उपाविशच्च।

6. <u>अधोलिखितेषु यथेच्छं पञ्च प्रश्नाः समाधेयाः।</u> [5×1]

क) सिद्धः कस्मात् किं प्राप्तवान्?

ख) शिवराजविजयः कीदृशो ग्रन्थः?

ग) क्षुद्ररामः कः? तस्य कीदृशः भाग्योदयः केन ज्ञापितः?

घ) शिवराजविजये कति निश्वासाः सन्ति?

ङ) दरिद्रदुर्दैवमिति रूपकं कुत्र कदा अनुष्ठितम्?

च) शिववीरः कुत्र निवसति स्म?

छ) पाशकानां वैशिष्ट्यं किमासीत्?

ज) अथ किम् इति नाटकम् केन प्रणीतम्?

झ) अथ किम् इति नाटकस्य नाट्यकृतः का उपाधिः?

———— × ————